# Mahaganapati Sahasranama Stotram 2 Varada Ganesha Sahasra Nama stotram

# મહાગણપતિસહસ્રનામસ્તોત્રં ૨ અથવા વરદગણેશસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : Mahaganapati Sahasranama Stotram 2 Varada Ganesha Sahasra Nama stotram

File name : mahAgaNapatisahasranAmastotra.itx

Category : sahasranAma, ganesha

Location : doc_ganesha

Transliterated by : DPD, help from Alex

Proofread by : DPD, NA, PSA Easwaran

Description-comments : Rudrayamala shrIdevIrahasya

Latest update : March 25, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 25, 2023

*sanskritdocuments.org*

# મહાગણપતિસહસ્રનામસ્તોત્રં ૨ અથવા વરદગણેશસહસ્રનામસ્તોત્રમ્

શ્રીગણેશાય નમઃ ।

શ્રીભૈરવ ઉવાચ -
શ઼ૃણુ દેવિ રહસ્યં મે યત્પુરા સૂચિતં મયા ।
તવ ભક્ત્યા ગણેશસ્ય વક્ષ્યે નામસહસ્રકમ્ ॥ ૧॥

શ્રીદેવ્યુવાચ -
ભગવન્ ગણનાથસ્ય વરદસ્ય મહાત્મનઃ ।
શ્રોતું નામસહસ્રં મે હૃદયં પ્રોત્સુકાયતે ॥ ૨॥

શ્રીભૈરવ ઉવાચ -
પ્રાઙ્ મે ત્રિપુરનાશે તુ જાતા વિઘ્નકુલાઃ શિવે ।
મોહેન મુહ્યતે ચેતસ્તે સર્વે બલદર્પિતાઃ ॥ ૩॥

તદા પ્રભું ગણાધ્યક્ષં સ્તુત્વા નામસહસ્રકૈઃ ।
વિઘ્ના દૂરાત્ પલાયન્ત કાલરુદ્રાદિવ પ્રજાઃ ॥ ૪॥

તસ્યાનુગ્રહતો દેવિ જાતોઽહં ત્રિપુરાન્તકઃ ।
તમદ્યાપિ ગણેશાનં સ્તૌમિ નામસહસ્રકૈઃ ॥ ૫॥

તમદ્ય તવ ભક્ત્યાહં સાધકાનાં હિતાય ચ ।
મહાગણપતેર્વક્ષ્યે દિવ્યં નામસહસ્રકમ્ ॥ ૬॥

(પાઠકાનાં ચ દાતૄણાં સુખસમ્પત્પ્રદાયકમ્ ।
દુઃખાપહં ચ શ્રોતૄણાં મન્ત્રનામસહસ્રકમ્) ॥ ૭॥

અસ્ય શ્રીવરદગણેશસહસ્રનામસ્તોત્રમન્ત્રસ્ય શ્રીભૈરવ ઋષિઃ ।
ગાયત્રી છન્દઃ । શ્રીમહાગણપતિર્દેવતા । ગં બીજમ્ । હ્રીં શક્તિઃ ।
કુરુ કુરુ કીલકમ્ ।
ધર્માર્થકામમોક્ષાર્થે સહસ્રનામસ્તવપાઠે વિનિયોગઃ ।

ધ્યાનમ્-

ૐહ્રીંશ્રીંક્લીં-ગણાધ્યક્ષો ગ્લૌંગં-ગણપતિર્ગુણી ।
ગુણાદ્યો નિર્ગુણો ગોપ્તા ગજવક્ત્રો વિભાવસુઃ ॥ ૮॥

વિશ્વેશ્વરો વિભાદીપ્તો દીપનો ધીવરો ધની ।
સદાશાન્તો જગત્ત્રાતો વિષ્વક્સેનો વિભાકરઃ ॥ ૯॥

વિસ્રમ્ભી વિજયી વૈદ્યો વારાન્નિધિરનુત્તમઃ ।
અણીયાન્ વિભવી શ્રેષ્ઠો જ્યેષ્ઠો ગાથાપ્રિયો ગુરુઃ ॥ ૧૦॥

સૃષ્ટિકર્તા જગદ્ધર્તા વિશ્વભર્તા જગન્નિધિઃ ।
પતિઃ પીતવિભૂષાઙ્ગો રક્તાક્ષો લોહિતામ્બરઃ ॥ ૧૧॥

વિરૂપાક્ષો વિમાનસ્થો વિનયઃ સનયઃ સુખી ।
સુરૂપઃ સાત્ત્વિકઃ સત્યઃ શુદ્ધઃ શઙ્કરનન્દનઃ ॥ ૧૨॥

નન્દીશ્વરો સદાનન્દી વન્દિસ્તુત્યો વિચક્ષણઃ ।
દૈત્યમર્દી મદાક્ષીબો મદિરારુણલોચનઃ ॥ ૧૧॥

સારાત્મા વિશ્વસારશ્ચ વિશ્વચારી વિલેપનઃ ।
પરં બ્રહ્મ પરં જ્યોતિઃ સાક્ષી ત્ર્યક્ષો વિકત્થનઃ ॥ ૧૪॥

વીરેશ્વરો વીરહર્તા સૌભાગ્યો ભાગ્યવર્ધનઃ ।
ભૃઙ્ગિરીટી ભૃઙ્ગમાલી ભૃઙ્ગકૂજિતનાદિતઃ ॥ ૧૫॥

વિનર્તકો વિનેતાપિ વિનતાનન્દનોઽર્ચિતઃ ।
વૈનતેયો વિનમ્રાઙ્ગો વિશ્વનેતા વિનાયકઃ ॥ ૧૬॥

વિરાટકો વિરાટશ્ચ વિદગ્ધો વિધિરાત્મભૂઃ ।
પુષ્પદન્તઃ પુષ્પહારી પુષ્પમાલાવિભૂષણઃ ॥ ૧૭॥

પુષ્પેષુર્મથનઃ પુષ્ટો વિકર્તા કર્તરીકરઃ ।
અન્ત્યોઽન્તકશ્ચિત્તગણશ્ચિત્તચિન્તાપહારકઃ ॥ ૧૮॥

અચિન્ત્યોઽચિન્ત્યરૂપશ્ચ ચન્દનાકુલમુણ્ડકઃ ।
લિપિતો લોહિતો લુપ્તો (૧૦૦) લોહિતાક્ષો વિલોભકઃ ॥ ૧૯॥

લુબ્ધાશયો લોભરતો લાભદોઽલઙ્ઘ્યગાત્રકઃ ।
સુન્દરઃ સુન્દરીપુત્રઃ સમસ્તાસુરઘાતનઃ ॥ ૨૦॥

નૂપુરાઢ્યો વિભવદો નરો નારાયણો રવિઃ ।
વિચારી વાન્તદો વાગ્મી વિતર્કી વિજયેશ્વરઃ ॥ ૨૧॥

સુપ્તો બુદ્ધઃ સદારૂપઃ સુખદઃ સુખસેવિતઃ ।
વિકર્તનો વિયચ્ચારી વિનટો નર્તકો નટઃ ॥ ૨૨॥

નાટ્યો નાટ્યપ્રિયો નાદોઽનન્તોઽનન્તગુણાત્મકઃ ।
વિશ્વમૂર્વિશ્વઘાતી ચ વિનતાસ્યો વિનર્તકઃ ॥ ૨૩॥

કરાલઃ કામદઃ કાન્તઃ કમનીયઃ કલાધરઃ ।
કારુણ્યરૂપઃ કુટિલઃ કુલાચારી કુલેશ્વરઃ ॥ ૨૪॥

વિકરાલો ગણશ્રેષ્ઠઃ સંહારો હારભૂષણઃ ।
રુરૂ રમ્યમુખો રક્તો રેવતીદયિતો રસઃ ॥ ૨૫॥

મહાકાલો મહાદંષ્ટ્રો મહોરગભયાપહઃ ।
ઉન્મત્તરૂપઃ કાલાગ્નિરગ્નિસૂર્યેન્દુલોચનઃ ॥ ૨૬॥

સિતાસ્યઃ સિતમાલ્યશ્ચ સિતદન્તઃ સિતાંશુમાન્ ।
અસિતાત્મા ભૈરવેશો ભાગ્યવાન્ ભગવાન્ ભગઃ ॥

ભર્ગાત્મજો ભગાવાસો ભગદો ભગવર્ધનઃ ।
શુભઙ્કરઃ શુચિઃ શાન્તઃ શ્રેષ્ઠઃ શ્રવ્યઃ શચીપતિઃ ॥ ૨૮॥

વેદાદ્યો વેદકર્તા ચ વેદવેદ્યઃ સનાતનઃ ।
વિદ્યાપ્રદો વેદસારો વૈદિકો વેદપારગઃ ॥ ૨૯॥

વેદધ્વનિરતો વીરો વરો વેદાગમાર્થવિત્ ।
તત્ત્વજ્ઞઃ સવર્ગઃ સાધુઃ સદયઃ સદ્ (૨૦૦) અસન્મયઃ ॥ ૩૦॥

નિરામયો નિરાકારો નિર્ભયો નિત્યરૂપભૃત્ । ।
નિર્વૈરો વૈરિવિધ્વંસી મત્તવારણસન્નિભઃ ॥ ૩૧॥

શિવઙ્કરઃ શિવસુતઃ શિવઃ સુખવિવર્ધનઃ ।
શ્વૈત્યઃ શ્વેતઃ શતમુખો મુગ્ધો મોદકભોજનઃ ॥ ૩૨॥

દેવદેવો દિનકરો ધૃતિમાન્ દ્યુતિમાન્ ધવઃ ।
શુદ્ધાત્મા શુદ્ધમતિમાઞ્છુદ્ધદીપ્તિઃ શુચિવ્રતઃ ॥ ૩૩॥

શરણ્યઃ શૌનકઃ શૂરઃ શરદમ્ભોજધારકઃ ।
દારકઃ શિખિવાહેષ્ટઃ શીતઃ શઙ્કરવલ્લભઃ ॥ ૩૪॥

શઙ્કરો નિર્ભવો નિત્યો લયકૃલ્લાસ્યતત્પરઃ । નિર્ભયો
લૂતો લીલારસોલ્લાસી વિલાસી વિભ્રમો ભ્રમઃ ॥ ૩૫॥

ભ્રમણઃ શશભૃત્ સૂર્યઃ શનિર્ધરણિનન્દનઃ ।
બુદ્ધો વિબુધસેવ્યશ્ચ બુધરાજો બલન્ધરઃ ॥ ૩૬॥

જીવો જીવપ્રદો જૈત્રઃ સ્તુત્યો નુત્યો નતિપ્રિયઃ ।
જનકો જિનમાર્ગજ્ઞો જૈનમાર્ગનિવર્તકઃ ॥ ૩૭॥

ગૌરીસુતો ગુરુરવો ગૌરાઙ્ગો ગજપૂજિતઃ ।
પરં પદં પરં ધામ પરમાત્મા કવિઃ કુજઃ ॥ ૩૮॥

રાહુર્દૈત્યશિરશ્છેદી કેતુઃ કનકકુણ્ડલઃ ।
ગ્રહેન્દ્રો ગ્રાહિતો ગ્રાહ્યોઽગ્રણીર્ઘુર્ઘુરનાદિતઃ ॥ ૩૯॥

પર્જન્યઃ પીવરો પોત્રી પીનવક્ષાઃ પરાર્જિતઃ ।
વનેચરો વનપતિર્વનવાસઃ સ્મરોપમઃ ॥ ૪૦॥

પુણ્યં પૂતઃ પવિત્રં ચ પરાત્મા પૂર્ણવિગ્રહઃ ।
પૂર્ણેન્દુશકલાકારો મન્યુઃ પૂર્ણમનોરથઃ ॥ ૪૧॥

યુગાત્મા યુગભૃદ્ યજ્વા (૩૦૦) યાજ્ઞિકો યજ્ઞવત્સલઃ । યોગભૃદ્
યશસ્વી યજમાનેષ્ટો વ્રજભૃદ્ વજ્રપઞ્જરઃ ॥ ૪૨॥

મણિભદ્રો મણિમયો માન્યો મીનધ્વજાશ્રિતઃ ।
મીનધ્વજો મનોહારી યોગિનાં યોગવર્ધનઃ ॥ ૪૩॥

દ્રષ્ટા સ્રષ્ટા તપસ્વી ચ વિગ્રહી તાપસપ્રિયઃ ।
તપોમયસ્તપોમૂર્તિસ્તપનશ્ચ તપોધનઃ ॥ ૪૪॥

રુચકો મોચકો રુષ્ટસ્તુષ્ટસ્તોમરધારકઃ ।
દણ્ડી ચણ્ડાંશુરવ્યક્તઃ કમણ્ડલુધરોઽનઘઃ ॥ ૪૫॥

કામી કર્મરતઃ કાલઃ કોલઃ ક્રન્દિતદિક્તટઃ ।
ભ્રામકો જાતિપૂજ્યશ્ચ જાડ્યહા જડસૂદનઃ ॥ ૪૬॥

જાલન્ધરો જગદ્વાસી હાસકૃદ્ હવનો હવિઃ ।
હવિષ્માન્ હવ્યવાહાક્ષો હાટકો હાટકાઙ્ગદઃ ॥ ૪૭॥

સુમેરુર્હિમવાન્ હોતા હરપુત્રો હલઙ્કુષઃ ।

હાલપ્રિયો હૃદાશાન્તઃ કાન્તાહૃદયપોષણઃ ॥ ૪૮॥

શોષણઃ ક્લેશહા ક્રૂરઃ કઠોરઃ કઠિનાકૃતિઃ ।
કૂવરો ધીમયો ધ્યાતા ધ્યેયો ધીમાન્ દયાનિધિઃ ॥

દવિષ્ઠો દમનો ધુસ્થો દાતા ત્રાતા સિતઃ સમઃ ।
નિર્ગતો નૈગમી ગમ્યો નિર્જેયો જટિલોઽજરઃ ॥ ૫૦॥

જનજીવો જિતારાતિર્જગદ્વ્યાપી જગન્મયઃ ।
ચામીકરનિભોઽનાદ્યો નલિનાયતલોચનઃ ॥ ૫૧॥

રોચનો મોચનો મન્ત્રી મન્ત્રકોટિસમાશ્રિતઃ ।
પઞ્ચભૂતાત્મકઃ પઞ્ચસાયકઃ પઞ્ચવક્ત્રકઃ ॥ ૫૨॥

પઞ્ચમઃ પશ્ચિમઃ પૂર્વઃ ( ૪૦૦) પૂર્ણઃ કીર્ણાલકઃ કુણિઃ ।
કઠોરહૃદયો ગ્રીવાલઙ્કૃતો લલિતાશયઃ ॥ ૫૩॥

લોલચિત્તો બૃહન્નાસો માસપક્ષર્તુરૂપવાન્ ।
ધ્રુવો દ્રુતગતિર્ધર્મ્યો ધર્મી નાકિપ્રિયોઽનલઃ ॥ ૫૪॥

અગસ્ત્યો ગ્રસ્તભુવનો ભુવનૈકમલાપહઃ ।
સાગરઃ સ્વર્ગતિઃ સ્વક્ષઃ સાનન્દઃ સાધુપૂજિતઃ ॥ ૫૫॥

સતીપતિઃ સમરસઃ સનકઃ સરલઃ સુરઃ ।
સુરાપ્રિયો વસુપતિર્વાસવો વસુપૂજિતઃ ॥ ૫૬॥

વિત્તદો વિત્તનાથશ્ચ ધનિનાં ધનદાયકઃ ।
રાજી રાજીવનયનઃ સ્મૃતિદઃ કૃત્તિકામ્બરઃ ॥ ૫૭॥

આશ્વિનોઽશ્વમુખઃ શુભ્રો ભરણો ભરણીપ્રિયઃ ।
કૃત્તિકાસનગઃ કોલો રોહી રોહણપાદુકઃ ॥ ૫૮॥

ઋભુવેષ્ટોઽરિમર્દી ચ રોહિણીમોહનોઽમૃતમ્ ।
મૃગરાજો મૃગશિરા માધવો મધુરધ્વનિઃ ॥ ૫૯॥

આર્દ્રાનનો મહાબુદ્ધિર્મહોરગવિભૂષણઃ ।
ભ્રૂક્ષેપદત્તવિભવો ભ્રૂકરાલઃ પુનર્મયઃ ॥ ૬૦॥

પુનર્દેવઃ પુનર્જેતા પુનર્જીવઃ પુનર્વસુઃ ।
તિત્તિરિસ્તિમિકેતુશ્ચ તિમિચારકઘાતનઃ ॥ ૬૧॥

તિષ્યસ્તુલાધરો જમ્ભ્યો વિશ્લેષોઽશ્લેષ એણરાટ્ ।
માનદો માધવો માધો વાચાલો મઘવોપમઃ ॥ ૬૨॥

મેધ્યો મઘાપ્રિયો મેઘો મહામુણ્ડો મહાભુજઃ ।
પૂર્વફાલ્ગુનિકઃ સ્ફીતઃ ફલ્ગુરુત્તરફાલ્ગુનઃ ॥ ૬૩॥

ફેનિલો બ્રહ્મદો બ્રહ્મા સપ્તતન્તુસમાશ્રયઃ ।
ઘોણાહસ્તશ્ચતુર્હસ્તો હસ્તિવક્ત્રો હલાયુધઃ ॥ ૬૪॥

ચિત્રામ્બરો(૫૦૦)ઽર્ચિતપદઃ સ્વાદિતઃ સ્વાતિવિગ્રહઃ ।
વિશાખઃ શિખિસેવ્યશ્ચ શિખિધ્વજસહોદરઃ ॥ ૬૫॥

અણૂ રેણુઃ કલાસ્ફારોઽનૂરૂ રેણુસુતો નરઃ ।
અનુરાધાપ્રિયો રાધ્યઃ શ્રીમાઞ્છુક્લઃ શુચિસ્મિતઃ ॥ ૬૬॥

જ્યેષ્ઠઃ શ્રેષ્ઠાર્ચિતપદો મૂલં ત્રિજગતો ગુરુઃ ।
શુચિઃ પૂર્વસ્તથાષાઢશ્ચોત્તરાષાઢ ઈશ્વરઃ ॥ ૬૭॥

શ્રવ્યોઽભિજિદનન્તાત્મા શ્રવો વેપિતદાનવઃ ।
શ્રાવણઃ શ્રવણઃ શ્રોતા ધની ધન્યો ધનિષ્ઠકઃ ॥ ૬૮॥

શાતાતપઃ શાતકુમ્ભઃ શતંજ્યોતિઃ શતમ્ભિષક્ ।
પૂર્વાભાદ્રપદો ભદ્રશ્ચોત્તરાભાદ્રપાદિતઃ ॥ ૬૯॥

રેણુકાતનયો રામો રેવતીરમણો રમી ।
અશ્વિયુક્ કાર્તિકેયેષ્ટો માર્ગશીર્ષો મૃગોત્તમઃ ॥ ૭૦॥

પુષ્યશૌર્યઃ ફાલ્ગુનાત્મા વસન્તશ્ચિત્રકો મધુઃ ।
રાજ્યદોઽભિજિદાત્મીયસ્તારેશસ્તારકદ્યુતિઃ ॥ ૭૧॥

પ્રતીતઃ પ્રોજ્જ્ઝિતઃ પ્રીતઃ પરમઃ પારમો હિતઃ ।
પરહા પઞ્ચભૂઃ પઞ્ચવાયુઃ પૂજ્યઃ પરં મહઃ ॥ ૭૨॥

પુરાણાગમવિદ્ યોગ્યો મહિષો રાસભોઽગ્રગઃ ।
ગ્રાહો મેષો વૃષો મન્દો મન્મથો મિથુનાર્ચિતઃ ॥ ૭૩॥

કલ્કભૃત્ કટકો દીનો મર્કટઃ કર્કટો ઘૃણી ।
કુક્કુટો વનજો હંસઃ પરહંસઃ શ઼ૃગાલકઃ ॥ ૭૪॥

સિંહઃ સિંહાસનો મૂષો મોહ્યો મૂષકવાહનઃ (૬૦૦) ।
પુત્રદો નરકત્રાતા કન્યાપ્રીતઃ કુલોદ્વહઃ ॥ ૭૫॥

અતુલ્યરૂપો બલદસ્તુલાભૃત્ તુલ્યસાક્ષિકઃ ।
અલિચાપધરો ધન્વી કચ્છપો મકરો મણિઃ ॥ ૭૬॥

સ્થિરઃ પ્રભુર્મહાકર્મી મહાભોગી મહાયશાઃ ।
વસુમૂર્તિધરો વ્યગ્રોઽસુરહારી યમાન્તકઃ ॥ ૭૭॥

દેવાગ્રણીર્ગણાધ્યક્ષો હ્યમ્બુજાલો મહામતિઃ ।
અઙ્ગદી કુણ્ડલી ભક્તિપ્રિયો ભક્તવિવર્ધનઃ ॥ ૭૮॥

ગાણપત્યપ્રદો માયી વેદવેદાન્તપારગઃ ।
કાત્યાયનીસુતો બ્રહ્મપૂજિતો વિઘ્નનાશનઃ ॥ ૭૯॥

સંસારભયવિધ્વંસી મહોરસ્કો મહીધરઃ ।
વિઘ્નાન્તકો મહાગ્રીવો ભૃશં મોદકમોદિતઃ ॥ ૮૦॥

વારાણસીપ્રિયો માની ગહન આખુવાહનઃ ।
ગુહાશ્રયો વિષ્ણુપદીતનયઃ સ્થાનદો ધ્રુવઃ ॥ ૮૧॥

પરર્દ્ધિસ્તુષ્ટો વિમલો મૌલિમાન્ વલ્લભાપ્રિયઃ ।
ચતુર્દશીપ્રિયો માન્યો વ્યવસાયો મદાન્વિતઃ ॥ ૮૨॥

અચિન્ત્યઃ સિંહયુગલનિવિષ્ટો બાલરૂપધૃત્ ।
ધીરઃ શક્તિમતાં શ્રેષ્ઠો મહાબલસમન્વિતઃ ॥ ૮૩॥

સર્વાત્મા હિતકૃદ્ વૈદ્યો મહાકુક્ષિર્મહામતિઃ ।
કરણં મૃત્યુહારી ચ પાપસઙ્ઘનિવર્તકઃ ॥ ૮૪॥

ઉદ્ભિદ્ વજ્રી મહાદૈત્યસૂદનો દીનરક્ષકઃ ।
ભૂતચારી પ્રેતચારી બુદ્ધિરૂપો મનોમયઃ ॥ ૮૫॥

અહઙ્કારવપુઃ સાઙ્ખ્યપુરુષસ્ત્રિગુણાત્મકઃ ।
તન્માત્રરૂપો ભૂતાત્મા ઇન્દ્રિયાત્મા વશીકરઃ ॥ ૮૬॥

મલત્રયબહિર્ભૂતો હ્યવસ્થાત્રયવર્જિતઃ ।
નીરૂપો બહુરૂપશ્ચ કિન્નરો નાગવિક્રમઃ ॥ ૮૭॥

એકદન્તો મહાવેગઃ સેનાની સ્ત્રિદશાધિપઃ ।
વિશ્વકર્તા વિશ્વબીજં (૭૦૦) શ્રીઃ સમ્પદ્હ્રીર્ધૃતિર્મતિઃ ॥ ૮૮॥

સર્વશોષકરો વાયુઃ સૂક્ષ્મરૂપઃ સુનિશ્ચલઃ ।

સંહર્તા સૃષ્ટિકર્તા ચ સ્થિતિકર્તા લયાશ્રિતઃ ॥ ૮૯॥

સામાન્યરૂપઃ સામાસ્યોઽથર્વશીર્ષા યજુર્ભુજઃ ।
ઋગીક્ષણઃ કાવ્યકર્તા શિક્ષાકારી નિરુક્તવિત્ ॥ ૯૦॥

શેષરૂપધરો મુખ્યઃ શબ્દબ્રહ્મસ્વરૂપભાક્ ।
વિચારવાગ્શઙ્ખધારી સત્યવ્રતપરાયણઃ ॥ ૯૧॥

મહાતપા ઘોરતપાઃ સર્વદો ભીમવિક્રમઃ ।
સર્વસમ્પત્કરો વ્યાપી મેઘગમ્ભીરનાદભૃત્ ॥ ૯૨॥

સમૃદ્ધો ભૂતિદો ભોગી વેશી શઙ્કરવત્સલઃ ।
શમ્ભુભક્તિરતો મોક્ષદાતા ભવદવાનલઃ ॥ ૯૩॥

સત્યસ્તપા ધ્યેયમૂર્તિઃ કર્મમૂર્તિર્મહાંસ્તથા ।
સમષ્ટિવ્યષ્ટિરૂપશ્ચ પઞ્ચકોશપરાઙ્મુખઃ ॥ ૯૪॥

તેજોનિધિર્જગન્મૂર્તિશ્ચરાચરવપુર્ધરઃ ।
પ્રાણદો જ્ઞાનમૂર્તિશ્ચ નાદમૂર્તિર્યુતોઽક્ષરઃ ॥ ૯૫॥

ભૂતાદ્યસ્તૈજસો ભાવો નિષ્કલશ્ચૈવ નિર્મલઃ ।
કૂટસ્થશ્ચેતનો રુદ્રઃ ક્ષેત્રવિત્ પુરુષો બુધઃ ॥ ૯૬॥

અનાધારોઽપ્યનાકારો ધાતા ચ વિશ્વતોમુખઃ ।
અપ્રતર્ક્યવપુઃ સ્કન્દાનુજો ભાનુર્મહાપ્રભઃ ॥ ૯૭॥

યજ્ઞહર્તા યજ્ઞકર્તા યજ્ઞાનાં ફલદાયકઃ ।
યજ્ઞગોપ્તા યજ્ઞમયો દક્ષયજ્ઞવિનાશકૃત્ ॥ ૯૮॥

વક્રતુણ્ડો મહાકાયઃ કોટિસૂર્યસમપ્રભઃ ।
એકદંષ્ટ્રઃ કૃષ્ણપિઙ્ગો વિકટો ધૂમ્રવર્ણકઃ ॥ ૯૯॥

ટઙ્કધારી જમ્બુકશ્ચ નાયકઃ શૂર્પકર્ણકઃ ।
સુવર્ણગર્ભઃ સુમુખઃ શ્રીકરઃ સર્વસિદ્ધિદઃ ॥ ૧૦૦॥

સુવર્ણવર્ણો હેમાઙ્ગો મહાત્મા ચન્દનચ્છવિઃ ।
સ્વઙ્ગઃ સ્વક્ષઃ (૮૦૦) શતાનન્દો લોકવિલ્લોકવિગ્રહઃ ॥ ૧૦૧॥

ઇન્દ્રો જિષ્ણુર્ધૂમકેતુર્વહ્નિઃ પૂજ્યો દવાન્તકઃ ।
પૂર્ણાનન્દઃ પરાનન્દઃ પુરાણપુરુષોત્તમઃ ॥ ૧૦૨॥

કુમ્ભભૃત્ કલશી કુબ્જો મીનમાંસસુતર્પિતઃ ।
રાશિતારાગ્રહમયસ્તિથિરૂપો જગદ્વિભુઃ ॥ ૧૦૩॥

પ્રતાપી પ્રતિપત્પ્રેયાન્ દ્વિતીયોઽદ્વૈતનિશ્ચિતઃ ।
ત્રિરૂપશ્ચ તૃતીયાગ્નિસ્ત્રયીરૂપસ્ત્રયીતનુઃ ॥ ૧૦૪॥

ચતુર્થીવલ્લભો દેવો પારગઃ પઞ્ચમીરવઃ ।
ષડ્રસાસ્વાદકોઽજાતઃ ષષ્ઠી ષષ્ટિકવત્સરઃ ॥ ૧૦૫॥

સપ્તાર્ણવગતિઃ સારઃ સપ્તમીશ્વર ઈહિતઃ ।
અષ્ટમીનન્દનોઽનાર્તો નવમીભક્તિભાવિતઃ ॥ ૧૦૬॥

દશદિક્પતિપૂજ્યશ્ચ દશમી દ્રુહિણો દ્રુતઃ ।
એકાદશાત્મા ગણપો દ્વાદશીયુગચર્ચિતઃ ॥ ૧૦૭॥

ત્રયોદશમનુસ્તુત્યશ્ચતુર્દશસુરપ્રિયઃ ।
ચતુર્દશેન્દ્રસંસ્તુત્યઃ પૂર્ણિમાનન્દવિગ્રહઃ ॥ ૧૦૮॥

દર્શાદર્શો દર્શનશ્ચ વાનપ્રસ્થો મુનીશ્વરઃ ।
મૌની મધુરવાઙ્મૂલં મૂર્તિમાન્ મેઘવાહનઃ ॥ ૧૦૯॥

મહાગજો જિતક્રોધો જિતશત્રુર્જયાશ્રયઃ ।
રૌદ્રો રુદ્રપ્રિયો રુક્મો રુદ્રપુત્રોઽઘતાપનઃ ॥ ૧૧૦॥

ભવપ્રિયો ભવાનીષ્ટો ભારભૃદ્ ભૂતભાવનઃ ।
ગાન્ધર્વકુશલોઽકુણ્ઠો વૈકુણ્ઠો વિષ્ણુસેવિતઃ ॥ ૧૧૧॥

વૃત્રહા વિઘ્નહા સીરઃ સમસ્તદુરિતાપહઃ ।
મઞ્જુલો માર્જનો મત્તો દુર્ગાપુત્રો દુરાલસઃ ॥ ૧૧૨॥

અનન્તચિત્સુધાધારો વીરો વીર્યૈકસાધકઃ ।
ભાસ્વન્મુકુટમાણિક્યઃ કૂજત્કિઙ્કિણિજાલકઃ ॥ ૧૧૩॥

શુણ્ડાધારી તુણ્ડચલઃ કુણ્ડલી મુણ્ડમાલકઃ ।
પદ્માક્ષઃ પદ્મહસ્તશ્ચ (૯૦૦) પદ્મનાભસમર્ચિતઃ ॥ ૧૧૪॥

ઉદ્ગીથો નરદન્તાઢ્યમાલાભૂષણભૂષિતઃ ।
નારદો વારણો લોલશ્રવણઃ શૂર્પકશ્રવાઃ ॥ ૧૧૫॥

બૃહદુલ્લાસનાસાઢ્યવ્યાપ્તત્રૈલોક્યમણ્ડલઃ ।
ઇલામણ્ડલસમ્ભ્રાન્તકૃતાનુગ્રહજીવકઃ ॥ ૧૧૬॥

બૃહત્કર્ણાઞ્ચલોદ્ભૂતવાયુવીજિતદિક્તટઃ ।
બૃહદાસ્યરવાક્રાન્તભીમબ્રહ્માણ્ડભાણ્ડકઃ ॥ ૧૧૭॥

બૃહત્પાદસમાક્રાન્તસપ્તપાતાલવેપિતઃ ।
બૃહદ્દન્તકૃતાત્યુગ્રરણાનન્દરસાલસઃ ॥ ૧૧૮॥

બૃહદ્ધસ્તધૃતાશેષાયુધનિર્જિતદાનવઃ ।
સ્ફુરત્સિન્દૂરવદનઃ સ્ફુરત્તેજોઽગ્નિલોચનઃ ॥ ૧૧૯॥

ઉદ્દીપિતમણિસ્ફૂર્જન્નૂપુરધ્વનિનાદિતઃ ।
ચલત્તોયપ્રવાહાઢ્યનદીજલકણાકુલઃ ॥ ૧૨૦॥

ભ્રમત્કુઞ્જરસઙ્ઘાતવન્દિતાઙ્ઘ્રિસરોરુહઃ ।
બ્રહ્માચ્યુતમહારુદ્રપુરઃસરસુરાર્ચિતઃ ॥ ૧૨૧॥

અશેષશેષપ્રભૃતિવ્યાલજાલોપસેવિતઃ ।
ગર્જત્પઞ્ચાનનારાવપ્રાપ્તાકાશધરાતલઃ ॥ ૧૨૨॥

હાહાહૂહૂકૃતાત્યુગ્રસુરવિભ્રાન્તમાનસઃ ।
પઞ્ચાશદ્વર્ણબીજાઢ્યમન્ત્રમન્ત્રિતવિગ્રહઃ ॥ ૧૨૩॥

વેદાન્તશાસ્ત્રપીયૂષધારાપ્લાવિતભૂતલઃ ।
શઙ્ખધ્વનિસમાક્રાન્તપાતાલાદિનભસ્તલઃ ॥ ૧૨૪॥

ચિન્તામણિર્મહામલ્લો ભલ્લહસ્તો બલિઃ કલિઃ ।
કૃતત્રેતાયુગોલ્લાસભાસમાનજગત્ત્રયઃ ॥ ૧૨૫॥

દ્વાપરઃ પરલોકૈકકર્મધ્વાન્તસુધાકરઃ ।
સુધાસિક્તવપુર્વ્યાપ્તબ્રહ્માણ્ડાદિકટાહકઃ ॥ ૧૨૬॥

અકારાદિક્ષકારાન્તવર્ણપઙ્ક્તિસમુજ્જ્વલઃ ।
અકારાકારપ્રોદ્ગીતતારનાદનિનાદિતઃ ॥ ૧૨૭॥

ઇકારેકારમન્ત્રાઢ્યમાલાભ્રમણલાલસઃ ।
ઉકારોકારપ્રોદ્ગારિઘોરનાગોપવીતકઃ ॥ ૧૨૮॥

ઋવર્ણાઙ્કિતૠકારપદ્મદ્વયસમુજ્જ્વલઃ ।
ૡકારયુતલૃકારશઙ્ખપૂર્ણદિગન્તરઃ ॥ ૧૨૯॥

એકારૈકારગિરિજાસ્તનપાનવિચક્ષણઃ ।

ઓકારૌકારવિશ્વાદિકૃતસૃષ્ટિક્રમાલસઃ ॥ ૧૩૦॥

અંઅઃવર્ણાવલીવ્યાપ્તપાદાદિશીર્ષમણ્ડલઃ ।
કર્ણતાલકૃતાત્યુચ્ચૈર્વાયુવીજિતનિર્જરઃ ॥ ૧૩૧॥

ખગેશધ્વજરત્નાઙ્કકિરીટારુણપાદકઃ ।
ગર્વિતાશેષગન્ધર્વગીતતત્પરશ્રોત્રકઃ ॥ ૧૩૨॥

ઘનવાહનવાગીશપુરઃસરસુરાર્ચિતઃ ।
ઙવર્ણામૃતધારાઢ્યશોભમાનૈકદન્તકઃ ॥ ૧૩૩॥

ચન્દ્રકુઙ્કુમજમ્બાલલિપ્તસુન્દરવિગ્રહઃ ।
છત્રચામરરત્નાઢ્યમુકુટાલઙ્કૃતાનનઃ ॥ ૧૩૪॥

જટાબદ્ધમહાનર્ઘમણિપઙ્ક્તિવિરાજિતઃ ।
ઝઙ્કારિમધુપવ્રાતગાનનાદનિનાદિતઃ ॥ ૧૩૫॥

ઞવર્ણકૃતસંહારદૈત્યાસૃક્પૂર્ણમુદ્ગરઃ ।
ટઙ્કારુકફલાસ્વાદવેપિતાશેષમૂર્ધજઃ ॥ ૧૩૬॥

ઠકારાઢ્યડકારાઙ્કઢકારાનન્દતોષિતઃ ।
ણવર્ણામૃતપીયૂષધારાધરસુધાધરઃ ॥ ૧૩૭॥

તામ્રસિન્દૂરપુઞ્જાઢ્યલલાટફલકચ્છવિઃ ।
થકારધનપઙ્ક્ત્યાઢ્યસન્તોષિતદ્વિજવ્રજઃ ॥ ૧૮॥

દયામયહૃદમ્ભોજધૃતત્રૈલોક્યમણ્ડલઃ ।
ધનદાદિમહાયક્ષસંસેવિતપદામ્બુજઃ ॥ ૧૩૯॥

નમિતાશેષદેવૌઘકિરીટમણિરઞ્જિતઃ ।
પરવર્ગાપવર્ગાદિમાર્ગચ્છેદનદક્ષકઃ ॥ ૧૪૦॥

ફણિચક્રસમાક્રાન્તગલમણ્ડલમણ્ડિતઃ ।
બદ્ધભ્રૂયુગભીમોગ્રસન્તર્જિતસુરાસુરઃ ॥ ૧૪૧॥

ભવાનીહૃદયાનન્દવર્ધનૈકનિશાકરઃ ।
મદિરાકલશસ્ફીતકરાલૈકકરામ્બુજઃ ॥ ૧૪૨॥

યજ્ઞાન્તરાયસઙ્ઘાતઘાતસજ્જીકૃતાયુધઃ ।
રત્નાકરસુતાકાન્તકાન્તિકીર્તિવિવર્ધનઃ ॥ ૧૪૩॥

લમ્બોદરમહાભીમવપુર્દીનીકૃતાસુરઃ ।
વરુણાદિદિગીશાનરચિતાર્ચનચર્ચિતઃ ॥ ૧૪૪॥

શઙ્કરૈકપ્રિયપ્રેમનયનાનન્દવર્ધનઃ ।
ષોડશસ્વરિતાલાપગીતગાનવિચક્ષણઃ ॥ ૧૪૫॥

સમસ્તદુર્ગતિસરિન્નાથોત્તારણકોડુપઃ ।
હરાદિબ્રહ્મવૈકુણ્ઠબ્રહ્મગીતાદિપાઠકઃ ॥ ૧૪૬॥

ક્ષમાપૂરિતહૃત્પદ્મસંરક્ષિતચરાચરઃ ।
તારાઙ્કમન્ત્રવર્ણૈકવિગ્રહોજ્જ્વલવિગ્રહઃ ॥ ૧૪૭॥

અકારાદિક્ષકારાન્તવિદ્યાભૂષિતવિગ્રહઃ ।
ૐશ્રીંવિનાયકો ૐહ્રીંવિઘ્નાધ્યક્ષો ગણાધિપઃ ॥ ૧૪૮॥

હેરમ્બો મોદકાહારો વક્ત્રતુણ્ડો વિધિસ્મૃતઃ ।
વેદાન્તગીતો વિદ્યાર્થી શુદ્ધમન્ત્રઃ ષડક્ષરઃ ॥ ૧૪૯॥

ગણેશો વરદો દેવો દ્વાદશાક્ષરમન્ત્રિતઃ ।
સપ્તકોટિમહામન્ત્રમન્ત્રિતાશેષવિગ્રહઃ ॥ ૧૫૦॥

ગાઙ્ગેયો ગણસેવ્યશ્ચ ૐશ્રીન્દ્વૈમાતુરઃ શિવઃ ।
ૐહ્રીંશ્રીંક્લીંગ્લૌંગંદેવો મહાગણપતિઃ પ્રભુઃ (૧૦૦૦) ॥ ૧૫૧॥

ઇદં નામ્નાં સહસ્રં તે મહાગણપતેઃ સ્મૃતમ્ ।
ગુહ્યં ગોપ્યતમં ગુપ્તં સર્વતન્ત્રેષુ ગોપિતમ્ ॥ ૧૫૨॥

સર્વમન્ત્રનિધિં દિવ્યં સર્વવિઘ્નવિનાશનમ્ ।
ગ્રહતારામયં રાશિવર્ણપઙ્ક્તિસમન્વિતમ્ ॥ ૧૫૩॥

સર્વવિદ્યામયં બ્રહ્મસાધનં સાધકપ્રિયમ્ ।
ગણેશસ્ય ચ સર્વસ્વં રહસ્યં ત્રિદિવૌકસામ્ ॥ ૧૫૪॥

યથેષ્ટફલદં લોકે મનોરથપ્રપૂરણમ્ ।
અષ્ટસિદ્ધિમયં સાધ્યં સાધકાનાં જયપ્રદમ્ ॥ ૧૫૫॥

વિનાર્ચનં વિના હોમં વિના ન્યાસં વિના જપમ્ ।
અણિમાદ્યષ્ટસિદ્ધીનાં સાધનં સ્મૃતિમાત્રતઃ ॥ ૧૫૬॥

ચતુર્થ્યામર્ધરાત્રે તુ પઠેન્મન્ત્રી ચતુષ્પથે ।
લિખેદ્ભૂર્જે રવૌ દેવિ પુણ્યં નામ્નાં સહસ્રકમ્ ॥ ૧૫૭॥

ધારયેત્તુ ચતુર્દશ્યાં મધ્યાહ્ને મૂર્ધ્નિ વા ભુજે ।
યોષિદ્વામકરે બદ્ધ્વા પુરુષો દક્ષિણે ભુજે ॥ ૧૫૮॥

સ્તમ્ભયેદપિ બ્રહ્માણં મોહયેદપિ શઙ્કરમ્ ।
વશયેદપિ ત્રૈલોક્યં મારયેદખિલાન્ રિપૂન્ ॥ ૧૫૯॥

ઉચ્ચાટયેચ્ચ ગીર્વાણાન્ શમયેચ્ચ ધનઞ્જયમ્ ।
વન્ધ્યા પુત્રાંલ્લભેચ્છીઘ્રં નિર્ધનો ધનમાપ્નુયાત્ ॥ ૧૬૦॥

ત્રિવારં યઃ પઠેદ્રાત્રૌ ગણેશસ્ય પુરઃ શિવે ।
નગ્નઃ શક્તિયુતો દેવિ ભુક્ત્વા ભોગાન્ યથેપ્સિતાન્ ॥ ૧૬૧॥

પ્રત્યક્ષં વરદં પશ્યેદ્ગણેશં સાધકોત્તમઃ ।
ય એનં પઠતે નામ્નાં સહસ્રં ભક્તિપૂર્વકમ્ ॥ ૧૬૨॥

તસ્ય વિત્તાદિવિભવો દારાયુઃસમ્પદઃ સદા ।
રણે રાજભયે દ્યૂતે પઠેન્નામ્નાં સહસ્રકમ્ ॥ ૧૬૩॥

સર્વત્ર જયમાપ્નોતિ ગણેશસ્ય પ્રસાદતઃ ।
ઇતીદં પુણ્યસર્વસ્વં મન્ત્રનામસહસ્રકમ્ ॥ ૧૬૪॥

મહાગણપતેર્ગુહ્યં ગોપનીયં સ્વયોનિવત્ ।

॥ ઇતિ શ્રીરુદ્રયામલે તન્ત્રે શ્રીદેવીરહસ્યે
મહાગણપતિસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by DPD, NA, PSA Easwaran

*Mahaganapati Sahasranama Stotram 2 Varada Ganesha Sahasra Nama stotram*

pdf was typeset on March 25, 2023

Please send corrections to *sanskrit@cheerful.com*